मृगो नेता आसां रात्रीणाम् मृगनेत्रा रात्रयः। पुष्यनेत्राः। नक्षत्रे इति किम? [1]देवदत्तनेतृकाः।

[६४४] छन्दसि [2]च नेतुरुपसङ्ख्यानम्। (म.भा. २.४४२)

'बृहस्पतिनेत्रा देवाः' (तै.सं. १.८.२०.१)। 'सोमनेत्राः' (मै.सं. २.६.३)।

[६४५] मासाद् भृतिप्रत्ययपूर्वपदाट् ठञ्विधिः। (म.भा. २.४४२)

पञ्चको मासोऽस्य पञ्चकमासिकः [3]कर्मकरः। दशकमासिकः। 'सोऽस्यांशवस्नभृतयः' (५.१.५६/१७२२) इति 'सङ्ख्याया अतिशदन्तायाः कन्' (५.१.५२/१६८७)॥

## अन्तर्बहिर्भ्यां च लोम्नः। (११७/८५५)

अन्तर् बहिस् इत्येताभ्यां परो यो लोमन्शब्दः तदन्ताद् बहुव्रीहेः अप् प्रत्ययो भवति[4]। अन्तर्गतानि लोमानि अस्य [5]अन्तर्लोमः प्रावारः। बहिर्लोमः [6]पटः॥

## अञ् नासिकायाः सञ्ज्ञायां नसं चास्थूलात्। (११८/८५६)

नासिकान्तात् बहुव्रीहेः अच् प्रत्ययो भवति,[7] नासिका[8]शब्दश्च नसमा[9]देशमापद्यते। अस्थूलात् इति नासिकाविशेषणं, न चेत् स्थूलशब्दात् परा नासिका भवति इति। सञ्ज्ञायाम् इति समुदायोपाधिः। द्रुरिव नासिका अस्य द्रुणसः[10]। [11]वार्ध्रीणसः। 'पूर्वपदात् सञ्ज्ञायामगः' (८.४.३/८५७) इति णत्वम्। गोनसः। सञ्ज्ञायाम् इति किम्? तुङ्गनासिकः। अस्थूलात् इति किम्? स्थूलनासिको [12]वराहः।

[६४६] खुरखराभ्यां नस् वक्तव्यः। (म.भा. २.४४३)

खुरणाः। खरणाः। पक्षेऽच्प्रत्ययोऽपि इष्यते। खुरणसः। खरणसः। शितिनाः, अहिनाः, अर्चनाः (म.भा. २.४४३) इति निगम [13]इष्यते॥

## उपसर्गाच्च। (११९/८५८)

उपसर्गात् परो यो नासिकाशब्दः तदन्तात् बहुव्रीहेः अच् प्रत्ययो भवति,[14] [15]नासिकाशब्दश्च नसमापद्यते। असञ्ज्ञार्थं वचनम्। उन्नता नासिका अस्य उन्नसः। प्रणसः। 'उपसर्गाद् बहुलम्' (८.४.२८/८५९) इति णत्वम्।

[६४७] वेर्ग्रो वक्तव्यः।

विगता नासिका अस्य विग्रः॥

---

1. देवदत्तनेतृकः क. 2. च नास्ति ड. 3. कर्मकारः क. 4. समासान्तः इत्यधिकम् ह. 5. असौ इत्यधिकम् ड. 6. पटः नास्ति क.फ. 7. समासान्तः इत्यधिकम् फ. 8. शब्दस्य ग. 9. आदेशं नास्ति फ.ह. 10. खरणसः इत्यधिकम् क.ग.ह. 11. वार्ध्रीणसः ड.फ. 12. वराहः नास्ति फ.ह. 13. इष्यते नास्ति फ. 14. समासान्तः इत्यधिकम् ग.फ.ह. 15. वाक्यमिदं नास्ति क.